११

348sk11

शिवराजविजयः - यवनदुराचारः

प्रस्तावना

योगिराजः ब्रह्मचारिमुखाद् यवनदुराचारं शृणोति इति अस्मिन् पाठे विषयः। तत्रादौ कालकलापः, महामदस्य भारताक्रमणम्, महामदस्य सोमतीर्थध्वंसः, महामदराज्यध्वंसः, यवनराज्यारम्भः, दक्षिणप्रदेशे सनातनधर्मरक्षकः शिववीरः इत्येवं क्रमशः विषया अस्मिन् पाठे वर्णिताः।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- यवनदुराचारं जानीयात्।
- कालकलापं जानीयात्।
- महामदस्य भारताक्रमणं जानीयात्।
- महामदस्य सोममन्दिराक्रमणं जानीयात्।
- महामदराज्यध्वंसं जानीयात्।
- भारते यवनराज्यारम्भं जानीयात्।
- दक्षिणदेशे शिववीरं जानीयात्।
- पाठ्यांशस्थानां पदानां व्याकरणविमर्शं पर्यायशब्दान् च जानीयात्।

११.१) सम्पूर्णः मूलपाठः

तत् संश्रुत्य भारतवर्षीय-दशा-संस्मरण-सञ्जात-शोको हृदयस्थ-प्रसादसम्भारोद्गिरण-श्रमेणेवातिमन्थरेण स्वरेण "मा स्म धर्मध्वंसन-घोषणैर्योगिराजस्य धैर्यमवधीरय" इति कण्ठं रुन्धतो बाष्पानविगणय्य, नेत्रे प्रमृज्य, उष्णं निःश्वस्य, कातराभ्यामिव नयनाभ्यां परितोऽवलोक्य ब्रह्मचारिगुरुः प्रवक्तुमारभत -

'भगवन्! दम्भोलिघटितेयं रसना, या दारुण-दानवोदन्तोदीरणैर्न दीर्य्यते, लोहसारमयं हृदयम्, यत् संस्मृत्य यावनान् परस्सहस्रान् दुराचारान् शतधा न भिद्यते, भस्मसाच्च न भवति। धिगस्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मन आर्य्यवंश्यांश्चाऽभिमन्यामहे'।

उपक्रमममुमाकर्ण्य अवलोक्य च मुनेर्विमनायमानं हरिद्राद्रवक्षालितमिव वदनम्, निपतद्वारिबिन्दुनी नयने, अञ्चितरोमकञ्चुकं शरीरम्, कम्पमानमधरम्,भज्यमानं च स्वरं

सकलपापमयः सकलोपद्रवमयश्चायं वृत्तान्तः' इति, अतएव तत्स्मरणमात्रेणापि खिद्यत एष हृदये, तन्नाहमेनं निरर्थं जिग्जलापयिषामि, न वा चिखेदयिषामि इति च विचिन्त्य-

'मुने! विलक्षणोऽयं भगवान् सकल-कला-कलाप-कलनः सकलकालनः करालः कालः। स एव कदाचित् पयःपूर-पूरितान्यकूपारतलानि मरूकरोति। सिंह-व्याघ्र-भल्लूक-गण्डक-फेरु-शश-सहस्रव्याप्तान्यरण्यानि जनपदीकरोति, मन्दिर-प्रासाद-हर्म्य-शृङ्गाटक-चत्वरोद्यानतडागगोष्ठमयानि नगराणि च काननीकरोति। निरीक्ष्यताम् कदाचिदस्मिन्नेव भारतवर्षे यायजूकै राजसूयादियज्ञा व्ययाजिषत, कदाचिदिहैव वर्षवाताऽऽतप-हिमसहानि तपांसि अतापिषत। सम्प्रति म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्य्यन्ते, स्मृतयः समृद्यन्ते; मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते। सर्वमेतन्माहात्म्यं तस्यैव महाकालस्येति कथं धीरधौरेयोऽपि धैर्यं विधुरयसि? शान्तिमाकलय्यातिसंक्षेपेण कथय यवनराजवृत्तान्तम्। न जाने किमित्यनावश्यकमपि शुश्रूषते मे हृदयम्' इति कथयित्वा तूष्णीमवतस्थे।

अथ स मुनिः - "धैर्येण प्रसादेन प्रतापेन तेजसा वीर्येण विक्रमेण श्रिया सौख्येन धर्मेण विद्यया च सममेव परलोकं सनाथितवति वीरविक्रमादित्ये, शनैः शनैः पारम्परिक-विरोध-विशिथिलीकृतस्नेहबन्धनेषु राजसु, भामिनी-भ्रूभङ्ग-भूरिभाव-प्रभाव-पराभूत-वैभवेषु भटेषु, स्वार्थ-चिन्ता-सन्तान-वितानैकतानेष्वमात्यवर्गेषु, प्रशंसामात्रप्रियेषु प्रभुषु, "इन्द्रस्त्वं वरुणस्त्वं कुवेरस्त्वम्" इति वर्णनामात्रसक्तेषु बुधजनेषु, कश्चन गजिनीस्थाननिवासी महामदो यवनः ससेनः प्राविशद् भारते वर्षे। स च प्रजा विलुण्ठ्य मन्दिराणि निपात्य, प्रतिमा विभिद्य, परश्शतान् जनांश्च दासीकृत्य शतश उष्ट्रेषु रत्नान्यारोप्य स्वदेशमनैषीत्।

एवं स ज्ञातास्वादः पौनःपुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत्। तस्मिन्नेव च स्वसंरम्भे एकदा गुर्जरप्रदेशचूडायितं सोमनाथ-तीर्थमपि धूलीचकार। अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते, परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्। तत्र हि महार्ह-वैदुर्य-पद्मराग-माणिक्य-मुक्ताफलादिजटितानि कपाटानि स्तम्भान्, गृहावग्रहणीः, भित्तीः वलभीः विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय शतद्वयमणसुवर्ण-शृङ्खलावलम्बिनीं चञ्चच्चाकचिक्य-चकितीकृतावलोचक-लोचन-निचयां महाघण्टां प्रसह्य सङ्गृह्य महादेवमूर्तावपि गदामुदतूतुलत्।

अथ "वीर, गृहीतमखिलं वित्तम्, पराजिता आर्यसेनाः, बन्दीकृता वयम्, सञ्चतममलं यशः, इतोऽपि न शाम्यति ते क्रोधश्चेदस्मान् ताडय, मारय, छिन्धि, भिन्धि, पातय, किन्तु त्यजेमाम् अकिञ्चित्करीं जडां महादेवप्रतिमाम्। यद्येवं न स्वीकरोषि तद् गृहाणोऽन्यदपि सुवर्णकोटिद्वयम्, मैनां भगवन्मूर्तिं स्प्राक्षीः" - इति साम्रेडं कथयत्सु रुदत्सु प्रणमत्सु च पूजकवर्गेषु नाहं मूर्तिविक्रीणामि, किन्तु भिनद्मि इति सङ्गर्ज्य जनताया हाहाकार-कलकलमाकर्णयन् घोरगदया मूर्तिमतुत्रुटत्। गदापातसमकालमेव चानेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि परितोऽवाकीर्यन्त। स च दग्धमुखः तानि रत्नानि मूर्तिखण्डानि

च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत्।

अथ कालक्रमेण सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे सशोकं सकष्टञ्च प्राणांस्त्यक्तवति महामदे, गोरदेशवासी कश्चित् शहाबुद्दीननामा प्रथमं गजिनीदेशमाक्रम्य, महामदकुलं धर्मराजलोकाध्वन्यध्वनीनं विधाय, सर्वाः प्रजाश्च पशुमारं मारयित्वा, तद्रुधिरार्द्रमृदा गोरदेशे बहून् गृहान् निर्माय चतुरङ्गिण्याऽनीकिन्या भारतवर्षं प्रविश्य, शीतलशोणितानप्यसयन् पञ्चाशदुत्तरद्वादशतमितेऽब्दे (१२५०) दिल्लीमश्वयाम्बभूव।

ततो दिल्लीश्वरं पृथ्वीराजं कान्यकुब्जेश्वरं जयचन्द्रञ्च पारस्परिकविरोधज्वरग्रस्तं विस्मृतराजनीतिं भारतवर्षदुर्भाग्यायमाणमाकल-य्यानायासेनोभावपि विशस्य, वाराणसीपर्यन्तमखण्डमण्डलमकण्टकमकीटकिट्टं महारत्नमिव महाराज्यमङ्गीचकार। तेन वाराणस्यामपि बहवोऽस्थिगिरयः प्रचिताः रिङ्गत्तरङ्गभङ्गा गङ्गाऽपि शोणितशोणा शोणीकृता, परस्सहस्राणि च देवमन्दिराणि भूमिसात्कृतानि।

तमारभ्याद्यावधि राक्षसा एव राजमकार्षुः। दानवा एव च दीनानदीदलन्। अभूत् केवलम् अकबरशाह-नामा यद्यपि गूढशत्रुर्भारतवर्षस्य तथापि शान्तिप्रियो विद्वत्प्रियश्च। अस्यैव प्रपौत्रो मूर्तिमदिव कलियुगं गृहीतविग्रह इव चाधर्मः आलमगीरोपाधिधारी अवरङ्गजीवः सम्प्रति दिलीवल्लभतां कलङ्कयति। अस्यैव पताका केकयेषु, मत्स्येषु, मगधेषु, अङ्गेषु बङ्गेषु कलिङ्गेषु च दोधूयन्ते, केवलं दक्षिणदेशेऽधुनाऽप्यस्य परिपूर्णो नाधिकारः संवृत्तः।

दक्षिणदेशो हि पर्वतबहुलोऽस्ति अरण्यानीसङ्कुलश्चास्तीति चिरोद्योगेनापि नायमशकन्महाराष्ट्रकेसरिणो हस्तयितुम्। साम्प्रतमस्यैवाऽऽत्मीयो दक्षिणदेशशासकत्वेन 'शास्तिखान'-नामा प्रेष्यत इति श्रूयते। महाराष्ट्रदेशरत्नम्, यवन-शोणित-पिपासाऽऽकुलकृपाणः, वीरता-सीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान-दोर्दण्डः, मुकुटमणिर्महाराष्ट्राणां, भूषणं भटानां, निधिर्नीतीनाम् कुलभवनं कौशलानां पारावारः परमोत्साहानां कश्चन प्रातःस्मरणीयः स्वधर्माऽऽग्रहग्रहग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन्पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति। विजयपुराधीश्वरेण साम्प्रतमस्य प्रवृद्धवैरम्। 'कार्यं वा साधयेयं देहं वा पातयेयम्' इत्यस्य सारगर्भा महती प्रतिज्ञा। सतीनां, सतां त्रैवर्णिकस्य, आर्यकुलस्य, धर्मस्य भारतवर्षस्य च आशा-सन्तान-वितानस्यायमेवऽऽश्रयः। इयमेव वर्तमाना दशा भारतवर्षस्य। किमधिकम् विनिवेदयामो योगबलावगतसकलगोप्यतमवृत्तान्तेषु योगिराजेषु इति कथयित्वा विरराम।

११.२) साम्प्रतं मूलपाठमवच्छाम - १६

तत् संश्रुत्य भारतवर्षीय-दशा-संस्मरण-सञ्जात-शोको हृदयस्थ-प्रसादसम्भारोद्गिरण-श्रमेणेवातिमन्थरेण स्वरेण "मा स्म धर्मध्वंसन-घोषणैर्योगिराजस्य धैर्यमवधीरय" इति कण्ठं रुन्धतो

बाष्पानविगणय्य, नेत्रे प्रमृज्य, उष्णं निःश्वस्य, कातराभ्यामिव नयनाभ्यां परितोऽवलोक्य ब्रह्मचारिगुरुः प्रवक्तुमारभत -

'भगवन्! दम्भोलिघटितेयं रसना, या दारुण-दानवोदन्तोदीरणैर्न दीर्य्यते, लोहसारमयं हृदयम्, यत् संस्मृत्य यावनान् परस्सहस्रान् दुराचारान् शतधा न भिद्यते, भस्मसाच्च न भवति। धिगस्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मन आर्य्यवंश्यांश्चाऽभिमन्यामहे'।

अन्वयार्थः -

तत् योगिराजवचनं संश्रुत्य निशम्य भारतवर्षीय- दशासंस्मरणसञ्जातशोकः भारतदेशीयानां स्थितिचिन्तनमात्रेण समुत्पन्ना करुणा यस्य स हृदयस्थप्रसारसम्भारोरीरणश्रमेण मानसप्रसन्नतासमूहनिःसारणपरिश्रमेण इव यथा अतिमन्थरेण नितान्तमन्देन स्वरेण ध्वनिना "मा स्म धर्मध्वंसोद्घोषणैः मा स्म श्रुतिप्रतिपाद्यधर्मोत्पाटनवचनैः योगिराजस्य महामुनेः धैर्यं वीरत्वम् अवधीय अवनमय" इति अनेन प्रकारेण कण्ठं गलविवरं रुन्धतः पिदधतः वाष्पान् नयनाश्रुनिवहान् अविगणय्य समुपेक्ष्य नेत्रे लोचने प्रमृज्य स्वच्छे विधाय उष्णं निदाघयुतं निःश्वस्य निःश्वासं स्वीकृत्य कातराभ्याम् इव करुणासहिताभ्याम् इव नयनाभ्यां नेत्राभ्यां परितः समन्ताद् अवलोक्य सन्दृश्य ब्रह्मचारिगुरुः वर्णिनाम् आचार्यः प्रवक्तुं कथयितुम् आरभत प्रारभत -

भगवन् महात्मन् दम्भोलिघटिता वज्रविनिर्मिता इयम् एषा सन्निकृष्टा रसना जिह्वा या दारुणदानवोदन्तोदीरणैः भीषणदैत्यवार्तासमुच्चारणैः न दीर्यते न भिद्यते, लोहसारमयं अयोमयसदृशम् अतिकठिनं हृदयं स्वान्तं यत् यावनान् यवनैः म्लेच्छैः विहितान् परस्सहस्रान् अनेकान् दुराचारान् अत्याचारान् संस्मृत्य स्मारं स्मारं शतधा खण्डेषु न भिद्यते विभज्यते, न च भस्मसात् भवति न च अग्निसाद् भवति। अस्मान् धिक् अत्राश्रमे निवसतः प्रति धिक्कारः, ये वयम् अद्यापि अस्मिन् दुराचारमये कालेऽपि जीवामः जीवनं धारयामः, श्वसिमः श्वासक्रियां कुर्मः, विचरामः सञ्चरणं कुर्मः, आत्मनः स्वान् अस्मान् आर्यवंशीयान् वैदिककुलोद्भवान् च अभिमन्यामहे स्वीकुर्मः।

व्याख्यानम् -

योगिराजो यदा भारतवर्षस्य इदानीन्तनस्थितिं ज्ञातुं ब्रह्मचारिगुरुं पृष्टवान्। तदा ब्रह्मचारिगुरोः का अवस्था अत्र सा वर्णिता। स हि भारतवर्षस्य यवनकृतायाः अवस्थाया वर्णनावसरे अत्यन्तं दुःखमनुभूतवान्। भारतवर्षस्य अवस्थावर्णनकाले ब्रह्मचारिगुरोः हृदये भारतीयानां दशास्मरणेन करुणा उदिता। तस्य मते तु योगिराजस्यापि इदं वर्णनं धैर्यस्य च्युतये कारणं भविष्यतीति। तस्य भारतवर्षवर्णनकाले कण्ठं नयनाश्रवः अवरुद्धवन्तः। तथापि स कथञ्चित् तान् नयनवाष्पान् अविगणय्य अश्रुसिक्तस्य नेत्रद्वयस्य मार्जनं विधाय दीर्घश्वासं स्वीकृतवान्। स सकरुणसदृशाभ्यां नयनाभ्यां सर्वां दिशं दृष्ट्वा ब्रह्मचारिगुरुः इत्येवं कथयितुम् आरब्धवान्।

ब्रह्मचारिगुरुः अत्र सनातनधर्मावलम्बिनाम् आर्याणां विषये खेदं प्रस्तुतवान्। स कथितवान यद् वज्रनिर्मिता हि तस्य रसना। अन्यथा तु भारतीयेषु दुष्टानां यवनानाम् अत्याचारस्य वर्णनेन सा भिन्ना भवेत्। एवमेव आर्याणां हृदयमपि वज्रसारम्। अतः एव यवनानाम् अत्याचारं स्मृत्वा अपि तद्

अनेकप्रकारेण न भिन्नम्। न हि तद् हृदयम् अग्निना दग्धम्। एवमेव आश्रमवासिनः ते निन्द्याः, यतो हि अस्मिन् यवनात्याचारसमये अपि ते आर्यवंशीयाः वयम् इति साभिमानं जीवनधारणं, श्वासधारणं सञ्चरणं च कुर्वन्ति। एवं यवनानां दुराचारप्रसङ्ग उक्तः।

व्याकरणविमर्शः

- संश्रुत्य - सम्पूर्वात् शृणोतेः "समानकर्तृकयोः पूर्वकाले" इति क्त्वाप्रत्यये ततः "समासेऽनञ्पूर्वे क्त्वो ल्यप्" इति ल्यपि रूपम्।
- भारतवर्षीयदशासंस्मरणसञ्जातशोकः - भारतवर्षस्येति विग्रहे भारतवर्षशब्दात् छप्रत्यये छस्य "आयनेयीनीनियियः फढखछघां प्रत्ययादीनाम्" इति ईयादेशे भारतवर्षीयेति सिध्यति। भारतवर्षीया चासौ दशा चेति भारतवर्षीयदशा इति कर्मधारयसमासः। भारतवर्षीयदशायाः संस्मरणं भारतवर्षीयदशासंस्मरणमिति षष्ठीतत्पुरुषः। भारतवर्षीयदशासंस्मरणेन सञ्जातः भारतवर्षीयदशासंस्मरणसञ्जातः इति तृतीयातत्पुरुषः। भारतवर्षीयदशासंस्मरणसञ्जातः शोको यस्य स भारतवर्षीयदशासंस्मरणसञ्जातशोकः इति बहुव्रीहिसमासः।
- हृदयस्थप्रसादसम्भारोद्गिरणश्रमेण - हृदये तिष्ठतीति विग्रहे हृदयोपपदे स्थाधातोः कप्रत्यये हृदयस्थशब्दो निष्पन्नः। हृदयस्थश्चासौ प्रसादसम्भारश्चेति हृदयस्थप्रसादसम्भारः इति कर्मधारयसमासः। तस्य उद्गिरणं हृदयस्थप्रसाद-सम्भारोद्गिरणमिति षष्ठीतत्पुरुषः। तस्मिन् श्रमः हृदयस्थप्रसाद-सम्भारोद्गिरणश्रमः, तेन हृदयस्थप्रसादसम्भारोद्गिरणश्रमेण इति सप्तमीतत्पुरुषः।
- अवधीरय - अवपूर्वाद् धृधातोर्लोटि मध्यमपुरुषैकवचने सिपि अवधीरय इति रूपम्।
- रुन्धतः - रुध्धातोः शतृप्रत्यये पुंसि शसि रूपम्।
- अविगणय्य - विपूर्वात् गण्धातोर्णिचि ल्यपि विगणय्य इति रूपम्। न विगणय्य अविगणय्य इति।
- प्रमृज्य - प्रपूर्वान्मृजेः क्त्वो ल्यपि प्रमृज्य इति रूपम्।
- अवलोक्य - अवपूर्वात् लोकिधातोः क्त्वो ल्यपि अवलोक्य।
- प्रवक्तुम् - प्रपूर्वाद् वक्तेः तुमुनि प्रवक्तुम् इति रूपम्।
- आरभत - आङ्पूर्वाद् रभतेः लङि प्रथमपुरुषैकवचने रूपम्।
- दम्भोलिघटिता – दम्भोलिना घटिता दम्भोलिघटिता इति तृतीयातत्पुरुषः।
- दारुणदानवोदन्तोदीरणैः - दारुणाः चामी दानवाश्च दारुणदानवाः इति कर्मधारयसमासः। दारुणदानवानाम् उदन्तः दारुणदानवोदन्तः इति षष्ठीतत्पुरुषः। दारुणदानवोदन्तस्य उदीरणानि, तैः दारुणदानवदन्तोदीरणैः इति षष्ठीतत्पुरुषः।
- भस्मसात् - भस्मशब्दाद् 'विभाषा साति कार्त्स्न्ये' इति सूत्रेण सातिप्रत्ययेन भस्मासात् इति निष्पन्नम्।
- धिगस्मान् इत्यत्र धिक्शब्दयोगा द्वितीया-

  उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।

द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।। इति वार्तिकेन।

कोषः

- "पुरोगमः पुरोगामी मन्दगामी तु मन्थरः" इत्यमरः।
- "चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः" इत्यमरः।
- "रसज्ञा रसना जिह्वा" इत्यमरः।
- "वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्" इत्यमरः।

पाठगतप्रश्नाः

१. आर्याणां रसना कीदृशी?

२. आर्याणां हृदयं कीदृशम्?

३. दम्भोलिघटिता इत्यत्र समासं दर्शयत।

११.३) साम्प्रतं मूलपाठमवच्छाम - १७

उपक्रममुपाकर्ण्य अवलोक्य च मुनेर्विमनायमानं हरिद्राद्रवक्षालितमिव वदनम्, निपतद्वारिबिन्दुनी नयने, अञ्चितरोमकञ्चुकं शरीरम्, कम्पमानमधरम्, भज्यमानं च स्वरम् अवागच्छत् 'सकलानर्थमयः, सकलवञ्चनामयः, सकलपापमयः सकलोपद्रवमयश्चायं वृत्तान्तः' इति, 'अतएव तत्स्मरणमात्रेणापि खिद्यत एष हृदये, तन्नाहमेनं निरर्थं जिग्जलापयिषामि, न वा चिखेदयिषामि' इति च विचिन्त्य-

'मुने! विलक्षणोऽयं भगवान् सकल-कला-कलाप-कलनः सकलकालनः करालः कालः। स एव कदाचित् पयःपूर-पूरितान्यकूपारतलानि मरूकरोति। सिंह-व्याघ्र-भल्लूक-गण्डक-फेरु-शश-सहस्रव्याप्तान्यरण्यानि जनपदीकरोति, मन्दिर-प्रासाद-हर्म्य-शृङ्गाटक-चत्वरोद्यानतडागगोष्ठमयानि नगराणि च काननीकरोति। निरीक्ष्यताम् कदाचिदस्मिन्नेव भारतवर्षे यायजूकै राजसूयादियज्ञा व्ययाजिषत, कदाचिदिहैव वर्षवाताऽऽतपहिमसहानि तपासिं अतापिषत। सम्प्रति म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्य्यन्ते, स्मृतयः समृद्यन्ते; मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते। सर्वमेतन्माहात्म्यं तस्यैव महाकालस्येति कथं धीरधौरेयोऽपि धैर्यं विधुरयसि? शान्तिमाकलय्यातिसंक्षेपेण कथय यवनराजवृत्तान्तम्। न जाने किमित्यनावश्यकमपि शुश्रूषते मे हृदयम्' इति कथयित्वा तूष्णीमवतस्थे।

अन्वयार्थः -

उपक्रमं भारतदुर्दशाया उपोद्घातम् उपाकर्ण्य श्रुत्वा अवलोक्य दृष्ट्वा च मुनेः ब्रह्मचारिणाम् आचार्यस्य विमनायमानम् उन्मनायमानं हरिद्राद्रवक्षालितम् इव महारजनरसधौतम् इव वदनं मुखम्, निपतद्वारिबिन्दुनी प्रवच्यवन्नयनजले, अञ्चितरोमकञ्चुकं सरोमाञ्चं शरीरं वपुः, कम्पमानं वेपमानम् अधरम्

ओष्ठद्वयम्, भज्यमानं त्रुट्यमानं च स्वरं शब्दम् अवागच्छत् ज्ञातवान्। 'सकलानर्थमयः अखिलपापमयः, सकलवञ्चनामयः अशेषवञ्चनासमन्वितः, सकलपापमयः समस्तपातकमयः सकलोपद्रवमयः सम्पूर्णोपसर्गमयः च अयम् एष वृत्तान्तः कथानकः' इति, 'अत एव अस्माद् हेतोः तत्स्मरणमात्रेण अपि तादृशावद्यस्मृतिमात्रेण अपि खिद्यते क्लेशम् अनुभवति, एष ब्रह्मचारिगुरुः हृदये चेतसि तत् तस्माद् अहं योगिराजः एनं महामुनिं निरर्थं निष्प्रयोजनं न नहि जिग्लापयिषामि ग्लापयितुं वाञ्छामि, न वा चिखेदयिषामि खेदयितुम् इच्छामि' इति च अनेन प्रकारेण विचिन्त्य चिन्तयित्वा-

मुने! ब्रह्मचारिगुरो! विलक्षणः विवेचनाक्षमः अयम् एष भगवान् निखिलैश्वर्यसम्पन्नः सकलकलाकलापकलनः अशेषकलासमूहनिर्माता सकलकालनः समस्तस्य विक्षयकारी करालः भयङ्करः कालः महाकालः स एव महाकाल एव कदादित् कस्मिंश्चित् समये पयःपूरपूरितानि वारिस्रोतोभरितानि अकूपारतलानि अब्धितलानि मरूकरोति मरुस्थलं विदधाति, सिंह-व्याघ्र-भल्लुक-गण्डक-पेरु-शश-सहस्रव्याप्तानि केसरि-शार्दूल-ऋक्ष-खड्गि-जम्बुक-हरिणसहस्र-समावृतानि अरण्यानि वनानि जनपदीकरोति नगरीकरोति, मन्दिर-प्रासाद-हर्म्य-शृङ्गाटकचत्वरोद्यानतडागगोष्ठमयानि देवसदन-राजसदन-धनिकावास-चतुष्पथाङ्गण-गोस्थानक-भूयिष्ठानि नगराणि जनपदानि च काननीकरोति वनीकरोति। निरीक्ष्यताम् अवलोक्यतां कदाचित् कस्मिंश्चित् समये अस्मिन् एव एतस्मिन् एव भारतवर्षे भारतदेशे यायजूकैः यागकरणशीलैः राजसूयादियज्ञाः राजसूयप्रभृतयः विविधयागाः व्ययाजषित विहिताः, कदाचित् कस्मिंश्चित् समये इह एव अस्मिन् एव भारतवर्षे भारतदेशे वर्षवातातपहिमसहानि वर्षाकालवनग्रीष्मशीतसहानि तपांसि कृच्छ्रादीनि कर्माणि च अतापिषत तप्तानि, सम्प्रति तु अस्मिन् काले तु म्लेच्छैः यवनैः गावः धेनवः हन्यन्ते प्राणैः वियुज्यन्ते, वेदाः श्रुतयः विदीर्यन्ते नाश्यन्ते, स्मृतयः मन्वादिप्रणीतानि धर्मशास्त्राणि समृद्यन्ते मर्दितानि क्रियन्ते, मन्दिराणि देवसदनानि मन्दुरीक्रियन्ते वाजिशालीक्रियन्ते, सत्यः पतिव्रता रमण्यः पात्यन्ते पातिव्रत्यात् वियुज्यन्ते, सन्तः च सत्पुरुषाः च सन्ताप्यन्ते सम्पीड्यन्ते, सर्वम् एतत् अखिलम् इदं माहात्म्यं महत्त्वं तस्य एव पूर्वोक्तस्य एव महाकालस्य इति इत्यस्मात् हेतोः कथं केन कारणेन धीरधौरेयः अपि धीरधुरन्धरः अपि धैर्यं धीरत्वं विधुरयसि परित्यजसि, शान्तिम् आकलय्य संश्रित्य अतिसङ्क्षेपेण अतीव समासेन कथय वद यवनराज्यवृत्तान्तं यवनशास्तिकथानकम्, न नहि जाने अवगच्छामि किमिति कथम् अनावश्यकम् अपि प्रयोजनहीनम् अपि शुश्रूषते श्रोतुम् इच्छति मे मम हृदयं स्वान्तम् इति एवम्प्रकारेण कथयित्वा वर्णयित्वा तूष्णीं मौनम् अवतस्थे जातः।

व्याख्यानम् -

उपक्रमं श्रुत्वा अवलोक्य ब्रह्मचारिणाम् आचार्यस्य रक्तं वदनम्, अश्रुसहिते नेत्रे, सरोमाञ्चं शरीरम्, वेपमानौ अधरौ अवरुध्यमानं च कण्ठं दृष्ट्वा च महामुनिः यवनात्याचारवृत्तान्तः अतीव दुःखदायकः इति ज्ञातवान्। ततः स ब्रह्मचारिगुरुं प्रति उक्तवान् वस्तुतो हि कालगतिः अननुमेया। कालचक्रेणैव अखिलं जगत् भवति नियन्त्रितम्। सर्वं हि वस्तुजातं कालाधीनम्। कालस्य द्विविधा मूर्तिः सर्जनात्मिका ध्वंसात्मिका च। तथाहि स कालः पृथिवीमिमां रम्यां विदधाति तथैव स एव निर्दयं सर्वं धूलिसात् करोति। स निमेषेण अरण्यानि जनपदीकरोति। अपरतो नगराणि काननीकरोति। प्राक्

कालप्रसादेन भारतवर्षे श्रुतिस्मृतिपुराणादीनाम् अनुशीलनपरम्परा आसीत्। सम्प्रति तु कालवशादेव तत्सर्वं प्रनष्टम्। तटप्रपात इव कालकृतिर्भवति भङ्गुरा। अत एव कालवशेन एव भवति सनातनधर्मस्य पीडनम् इति विविच्य धैर्यधारणं कर्तव्यम्। यतो हि चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च इति महामुनेराशयः।

व्याकरणविमर्शः

- विमनायमानम् – विगतं मनः यस्य स विमनाः इति बहुव्रीहिः। विमनाः इव आचरतीति विमनःशब्दात् क्यचि शानचि पुंसि अमि रूपम्।
- हरिद्राद्रवक्षालितम् - हरिद्रायाः द्रवः हरिद्रादवः इति षष्ठीतत्पुरुषः। तेन क्षालितं हरिद्राद्रवक्षालितम् इति तृतीयातत्पुरुषः।
- निपतद्वारिबिन्दूनी - निपतन्तो वारिबिन्दवो याभ्यां ते निपतद्वारि-बिन्दूनी इति बहुव्रीहिः। वारिणां बिन्दवः वारिबिन्दवः इति षष्ठीतत्पुरुषः।
- अञ्चितरोमकञ्चुकम् - रोमाणां कञ्चुकाः रोमकञ्चुकाः इति षष्ठीतत्पुरुषः। अञ्चिताः रोमकञ्चुकाः यत्र तदिति बहुव्रीहिः।
- जिग्लापयिषामि - ग्लै हर्षक्षये इति धातोः पुकि णिचि सनि लटि मिपि रूपम्।
- चिखेदिषामि - खिदेर्णिचि सनि मिपि रूपम्।
- सकलकलाकलापकलनः - सकला या कलाः सकलकलाः इति कर्मधारयः। सकलकलानां कलापः सकलकलाकलापः इति षष्ठीतत्पुरुषः। तस्य कलनः सकलकलाकलापकलनः इति षष्ठीतत्पुरुषः।
- सकलकलनः - सकलानां कलनः इति षष्ठीतत्पुरुषः।
- पयःपूरपूरितानि - पयसां पूरः पयःपूरः इति षष्ठीतत्पुरुषः। तेन पूरितानि पयःपूरितानि इति तृतीयातत्पुरुषः।
- काननीकरोति - अकाननिा काननानि करोति इति काननशब्दाद् अभूततद्भावे च्वौ, कृधातोर्लटि तिपि इति रूपम्।

कोषः

- "कलापो भूषणे बर्हे तूणीरे संहतावपि" इत्यमरः।
- "कालो मृत्यौ महाकाले" इत्यमरः।
- "शृङ्गाटकचतुष्पथे" इत्यमरः।
- "इज्याशीलो यायजूको यज्वा तु विधिगेष्टवान्" इत्यमरः।

पाठगतप्रश्नाः

४. यवनदुराचारवृत्तान्तः कीदृशः?

५. कीदृशः कालः?

६. कीदृशानि अरण्यानि जनपदीकरोति कालः।

७. कीदृशानि नगराणि काननीकरोति कालः।

११.४) साम्प्रतं मूलपाठमवच्छाम - १८

अथ स मुनिः - "धैर्येण प्रसादेन प्रतापेन तेजसा वीर्येण विक्रमेण शान्त्या श्रिया सौख्येन धर्मेण विद्यया च सममेव परलोकं सनाथितवति तत्रभवति वीरविक्रमादित्ये, शनैः शनैः पारम्परिक-विरोध-विशिथिलीकृत-स्नेहबन्धनेषु राजसु, भामिनी-भ्रूभङ्ग-भूरिभाव-प्रभाव-पराभूत-वैभवेषु भटेषु, स्वार्थ-चिन्ता-सन्तान-वितानैकतानेष्वमात्यवर्गेषु, प्रशंसामात्रप्रियेषु प्रभुषु, "इन्द्रस्त्वं वरुणस्त्वं कुवेरस्त्वम्" इति वर्णनामात्रसक्तेषु बुधजनेषु कश्चन गजिनीस्थाननिवासी महामदो यवनः ससेनः प्राविशद् भारते वर्षे। स च प्रजा विलुण्ठ्य, मन्दिराणि निपात्य, प्रतिमा विभिद्य, परश्शतान् जनांश्च दासीकृत्य, शतश उष्ट्रेषु रत्नान्यारोप्य स्वदेशमनैषीत्।

अन्वयार्थः -

अथ योगिराजवचनश्रवणाद् अनन्तरं स प्रसिद्धः मुनिः ब्रह्मचारिगुरुः अवदद् भगवन् योगिराट्, धैर्येण धीरतया प्रसादेन प्रसन्नतया प्रतापेन प्रभावेण तेजसा कान्त्या वीर्येण सामर्थ्येन विक्रमेण पराक्रमेण शान्त्या शमेन श्रिया लक्ष्म्या सौख्येन सुखेन धर्मेण श्रुतिपविहितेन कर्मणा विद्यया ज्ञानेन च पुनः समम् एव सार्धम् एव परलोकं स्वर्लोकं सनाथितवति प्रस्थिते तत्रभवति पूज्ये वीरविक्रमादित्ये एतन्नामकोज्जयिनीशासके, शनैः शनैः मन्दं मन्दं पारस्परिकविरोधविशिथिल-स्नेहबन्धेषु अन्योऽन्यवैरश्लथीकृतप्रेमसम्बन्धेषु राजसु नृपेषु, भामिनी-भ्रूजङ्ग-भूरिभावप्रभावपराभववैभवेषु कामिनीभ्रूविलास-बहुलीला-प्रभाव-पराजयधनेषु भटेषु वीरेषु, स्वार्थचिन्तासन्तानवितानैकतानेषु मलिन-स्वाभ्युदय-चिन्तामात्र-परायणेषु अमात्यवर्गेषु सचिवसमूहेषु प्रशंसामात्रप्रियेषु निजकीर्तिश्रुतिरसिकेषु प्रभुषु शासकेषु, "इन्द्रस्त्वं पुरन्दरस्त्वं वरुणस्त्वं यादसां पतिस्त्वं कुवेरस्त्वं धनाधिपतिस्त्वमि"ति एवम्प्रकारेण वर्णनामात्रसक्तेषु प्रशंसामात्रतत्परेषु बुधजनेषु सुधीसमुदायेषु, कश्चन कोऽपि गजिनीस्थानवासी गजिनीति प्रसिद्धजनपदकृतवसतिः महामदः महमुद इत्याख्यः यवनः म्लेच्छः ससेनः चमूभिः सहितः प्राविशत् प्रवेशनम् अकरोत् भारते वर्षे भारताख्ये देशे। स महमूदनामकः च पुनः प्रजाः जनताः विलुण्ठ्य अपहृत्य मन्दिराणि देवसदनानि निपात्य पातयित्वा प्रतिमाः विग्रहान् विभिद्य विदीर्य परःशतान् शताधिकान् जनान् प्रजाः दासीकृत्य दासान् विधाय शतशः अनेकेषु उष्ट्रेषु क्रमेलकेषु रत्नानि मणिमाणिक्यादीनि आरोप्य संस्थाप्य स्वदेशं गजनीति निजस्थानम् अनैषीत् स्वीकृतवान्।

व्याख्यानम् -

अत्र महामदस्य भारताक्रमणं सोमनाथमन्दिरस्य लुण्ठनं च वर्णितम्। यदा धैर्यं प्रसन्नता प्रतापः तेजः, विक्रमः धर्मः इत्यादिगुणानाम् आश्रयः विक्रमादित्यः स्वर्गलोकं गतवान् तदा कश्चित् गजिनीनामकस्य स्थानस्य राजा महामदः सैन्यानि स्वीकृत्य भारतवर्षम् आगतवान्। स भारतीयान् मारयित्वा मन्दिराणि प्रतिमाः च नाशयित्वा, बहून् जनान् स्वस्य दासरूपेण अङ्गीकृत्य बहूनि रत्नानि च बलात् स्वीकृत्य स्वस्य राजधानीं गजिनीस्थानं प्रति अगच्छत्।

व्याकरणविमर्शः

- सनाथितवति - नाथेन सह वर्तते सनाथ इति सहार्थबहुव्रीहिः। सनाथं करोति सनाथयति। ततः ण्यन्तात् सनाथेः क्तवतुप्रत्यये ततः सप्तम्यां ङौ सनाथितवति इति रूपम्।
- पारस्परिकविरोधविशिथिलीकृतस्नेहबन्धनेषु - पारस्परिको विरोधः कर्मधारयसमासः। तेन विशिथिलीकृतः इति तृतीयातत्पुरुषः। स्नेहस्य बन्धनमिति षष्ठीतत्पुरुषः। पारस्परिकविरोधविशिथिलीकृतं स्नेहबन्धनं येषां ते पारस्परिकविरोधविशिथीलकृतस्नेहबन्धनाः इति बहुव्रीहिः, तेषु।
- स्वार्थचिन्तासन्तानवितानैकतानेषु - स्वार्थानां चिन्ताः इति षष्ठीतत्पुरुषः। स्वार्थचिन्तानां सन्तानम् इति षष्ठीतत्पुरुषः। तस्य वितानम् इति षष्ठीतत्पुरुषः। तस्मिन् एकतानाः सप्तमीतत्पुरुषः, तेषु।
- प्रशंसामात्रप्रियेषु - प्रशंसा एव प्रशंसामात्रम् इति नित्यसमासः। प्रशंसामात्रं प्रियं येषां ते प्रशंसामात्रप्रियाः इति बहुव्रीहिः, तेषु।
- वर्णनामात्रसक्तेषु - वर्णना एव वर्णनामात्रम् इति नित्यसमासः। तत्र सक्तेषु वर्णनामात्रसक्तेषु इति सप्तमीतत्पुरुषः।
- गजिनीस्थाननिवासी - गजिनीनामकं स्थानं गजिनीस्थानमिति शाकपार्थिवादिवत्समासः। तत्र निवासी इति सप्तमीतत्पुरुषः।

कोषः

- "शङ्खः स्यात्कम्बुरस्त्रियाम्" इत्यमरः।

पाठगतप्रश्नाः

८. विक्रमादित्यः केन सह परलोकं गतः?

९. गजनीस्थाननिवासी इत्यत्र कः समासः?

१०. राज्ञां परस्परवैरं यदा प्रवृद्धं तदा कः भारतवर्षम् आक्रान्तवान्।

११. भारतवर्षाक्रमणात्परं महामदः किं कृतवान्।

११.५) साम्प्रतं मूलपाठमवच्छाम - १९

एवं स ज्ञातास्वादः पौनःपुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत्। तस्मिन्नेव च स्वसंरम्भे एकदा गुर्जरप्रदेशचूडायितं सोमनाथतीर्थमपि धूलीचकार। अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते, परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्। तत्र हि महार्ह-वैदुर्य-पद्मराग-माणिक्य-मुक्ताफलादिजटितानि कपाटानि स्तम्भान्, गृहावग्रहणीः, भित्तीः वलभीः विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय शतद्वयमणसुवर्ण-शृङ्खलावलम्बिनीं चञ्चच्चाकचिक्य-चकितीकृतावलोचक-लोचन-निचयां महाघण्टां प्रसह्य सङ्गृह्य महादेवमूर्तावपि गदामुदतूतुलत्।

अन्वयार्थः -

एवम् अनेन प्रकारेण स महामदः ज्ञातास्वादः सम्प्राप्तविलुण्ठनरसः पौनःपुन्येन भूयो भूयः द्वादशवारम् आगत्य समेत्य भारतं भारतवर्षम् अलुलुण्ठत् लुण्ठितवान्। तस्मिन्नेव लुण्ठनविषयके एव स्वसंरम्भे निजोद्योगे एकदा एकस्मिन् समये गुर्जरदेशचूडायितं गुर्जर(गुजराट्)-प्रदेशस्य भूषणभूतं सोमनाथतीर्थम् अपि सोमनाथेश्वरमूर्तिम् अपि धूलीचकार नाशितवान्। अद्य तु सम्प्रति तु तत्तीर्थस्य सोमनाथतीर्थस्य नाम अपि अभिधानम् अपि केनापि केनचिद् अपि जनेन न नहि स्मर्यते स्मृतिपथम् आनीयते। परं किन्तु तत्समये तदानीन्तने काले लोकोत्तरं लोकश्रेष्ठं तस्य सोमनाथमन्दिरस्य वैभवं सम्पत् आसीत् अवर्तत। तत्र सोमनाथदेवमन्दिरे हि महार्हवैदूर्यपद्मरागमाणिक्यमुक्ताफलादिजटितानि महार्हाणि बहुमूल्यानि वैदुर्यपद्मरागमाणिक्यमुक्ताफलादीनि वैदूर्यलोहिकतमणिमौक्तिकादीनि तैः जटितानि कपाटानि द्वाराणि, स्तम्भान् स्थूणाः, गृहावग्रहणीः आवासानां देहलीः, भित्तीः कुड्यानि, वलभीः गोपानसीः, विटङ्कानि च कपोतपालिकाः च निर्मथ्य मथित्वा रत्ननिचयं माणिक्यसमूहम् आदाय संगृह्य शतद्वयमणसुवर्णशृङ्खलावलम्बिनीं द्विशतमणहेमेन निर्मितां शृङ्खलावलम्बिनीं चञ्चञ्चाकचिक्यचकितीकृतावलोचक-लोचननिचयां चञ्चच्चाकचक्येन सुवर्णस्य उज्ज्वलवर्णेन चकितीकृतः विस्मयीकृतः अवलोचकलोचनानां समूहः द्रष्टुः नेत्रसमूहः यया ताम् उज्ज्वलसुवर्णवर्णशोभितां महाघण्टां बृहद्घण्टां प्रसह्य बलात् सङ्गृह्य स्वीकृत्य महादेवमूर्तौ अपि महादेवस्य पार्वतीप्राणनाथस्य मूर्तौ विग्रहे अपि गदां तादृशशस्त्रम् उदतूतुलत् उत्तोलितवान्।

व्याख्यानम् -

एकवारं भारते लुण्ठनादिकं कृत्वा महामदस्य लोभः वर्धितः। अतः स द्वादशवारं भारतर्षं प्रति आक्रान्तवान्। तदा एकवारं स गुर्जरप्रदेशस्य अभिधानम् आधुनिकगुजराट्प्रदेशस्य विख्यातस्य सोमनाथमन्दिरस्य लुण्ठनं कृतवान्। अधुना तस्य तीर्थस्य तथा अभिधानं नास्ति, परन्तु पुरा तत्तीर्थम् अत्यन्तं प्रसिद्धम् आसीत्। तस्मिन् मन्दिरे यावद् वैभव्यम् आसीत् तावत् तस्मिन् समये जगति कुत्रापि नासीत्। तस्य मन्दिरस्य द्वाराणि स्तम्भानि च बहुमूल्यवैदूर्यपद्मरागमणि-माणिक्यादिरत्नैः निर्मितानि आसन्। न केवलं एतदेव तत्र यानि गृहाणि मन्दिरस्य भित्तयः च आसन् तानि अपि मणिमुक्तादिवेष्टितानि। पशुपक्षिणाम् आवासस्थानानि अपि सुवर्णेन निर्मितानि। मन्दिरस्य देहल्याम् अन्तः शतशः पद्मरागादिबहुमूल्यानि रत्नानि स्थापितानि। महामदः तानि सर्वाणि विनाश्य स्वीकृतवान्। किञ्च तस्मिन्

मन्दिरे एका महाघण्टा आसीत् या द्विशतमणिपरिमितसुवर्णेन निर्मिता। तस्या औज्ज्वल्यं दृष्ट्वा सर्वे चकिताः। तां महाघण्टामपि स्वीकृत्य स गदया महादेवमूर्तिं नाशितवान्।

व्याकरणविमर्शः

- स्वप्नजालपरतन्त्रेण – स्वप्न एव जालं स्वप्नजालमिति कर्मधारयसमासः। तस्य परतन्त्रेण स्वप्नजालपरतन्त्रेण इति षष्ठीतत्पुरुषसमासः।
- ज्ञातास्वादः - ज्ञात आस्वादः येन स ज्ञातास्वादः इति बहुव्रीहिसमासः।
- गुर्जरदेशचूडायितम् - गुर्जरदेशस्य चूडायितं गूर्जरदेशचूडायितम् इति षष्ठीतत्पुरुषः।
- वैदूर्यपद्मरागमाणिक्यमुक्ताफलजटितानि - वैदूर्यं च पद्मरागः च माणिक्यं च मुक्ताफलं च वैदूर्यपद्मरागमाणिक्यमुक्ताफलानि इति इतरेतरद्वन्द्वसमासः। तैः जटितानि इति तृतीयातत्पुरुषः।
- रत्ननिचयम् - रत्नानां निचयः रत्ननिचयः, तमिति षष्ठीतत्पुरुषः।

कोषः

- “कालो दिष्टोऽप्यनेहापि समयः” इत्यमरः।
- “स्तम्भौ स्थूणाजडीभावौ” इत्यमरः।
- “गोपानसी तु वलभी” इत्यमरः।
- “वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः” इत्यमरः।

पाठगतप्रश्नाः

१२. महामदः कतिवारं भारतस्य विलुण्ठनं कृतवान्।

१३. महामदः किं धूलीचकार।

१४. महामदः सोमनाथमन्दिरस्य कीदृशी घण्टां स्वीकृतवान्।

१५. गुर्जरदेशचूडायितम् इत्यत्र कः समासः।

११.६) साम्प्रतं मूलपाठमवच्छाम - २०

अथ "वीर, गृहीतमखिलं वित्तम्, पराजिता आर्यसेनाः, बन्दीकृता वयम्, सञ्चितममलं यशः, इतोऽपि न शाम्यति ते क्रोधश्चेदस्मान् ताडय, मारय, छिन्धि, भिन्धि, पातय, किन्तु त्यजेमाम् अकिञ्चित्करीं जडां महादेवप्रतिमाम्। यद्येवं न स्वीकरोषि तद् गृहाणास्मत्तोऽन्यदपि सुवर्णकोटिद्वयम्, त्रायस्व, मैनां भगवन्मूर्तिं स्प्राक्षीः" - इति साम्रेडं कथयत्सु रुदत्सु पतत्सु विलुण्ठत्सु प्रणमत्सु च पूजकवर्गेषु - "नाहं मूर्तिं विक्रीणामि, किन्तु भिनद्मि" इति सङ्गर्ज्य जनताया हाहाकारकलकलमाकर्णयन् घोरगदया मूर्तिमतुत्रुटत्। गदापातसमकालमेव चानेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि

परितोऽवाकीर्यन्त। स च दग्धमुखः तानि रत्नानि मूर्तिखण्डानि च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत्।

अन्वयार्थः -

अथ महादेवविग्रहे गदाघाताद् अनन्तरं, वीर शूर महामद, गृहीतं स्वायत्तीकृतम् अखिलं समग्रं वित्तं रत्नम्, पराजिताः पराभवग्रस्ताः आर्यसेनाः आर्यचमूः, बन्दीकृताः निगडिता वयम् आर्याः, सञ्चितं संगृहीतम् अमलं स्वच्छं यशः कीर्तिः, इतः अपि एतादृशात् सौभाग्यात्परमपि ते तव क्रोधः अमर्षः न नहि शाम्यति शान्तो भवति चेत् यदि अस्मान् पूजकवृन्दान् ताडय प्रहर, मारय प्राणरहितान् कुरु, छिन्धि विदारय, भिन्धि भिन्नान् कुरु, पातय पर्वतशिखरात् अधःपातं विधेहि, मज्जय पारावारतले अवगाहय, खण्डय शरीराणि खण्डितानि विधेहि, कर्तय द्विधा देहं कुरु, ज्वलय वह्नौ गात्रदाहं कारय, किन्तु परन्तु इमां सम्मुखस्थाम् अकिञ्चित्करीं न किञ्चिदपि क्रियाशीलां जडां चैतन्यविरहितां महादेवप्रतिमां शिवमूर्तिं त्यज मुञ्च। यदि एवम् इत्थं न नहि स्वीकरोषि अङ्गीकरोषि तत् तर्हि अस्मत्तः अस्मभ्यं पूजकेभ्यः अन्यदपि इतः अधिकमपि सुवर्णकोटिद्वयं कोटिद्वयहेममुद्रां गृहाण स्वीकुरु, एनाम् इमां भगवन्मूर्तिं शिवलिङ्गं मा नहि स्प्राक्षीः स्पृश इति इत्थं साम्रेडं बहुशः बहुवारं कथयत्सु वदत्सु रुदत्सु प्रलापरतेषु प्रणमत्सु प्रणामकुर्वत्सु च पूजकवर्गेषु शिवसेवकसमुदायेष अहं महामदः न नहि मूर्तीः विक्रीणामि विग्रहानां विक्रयं करोमि, किन्तु परन्तु भिनद्मि भेदं करोमि इति अनेन प्रकारेण सङ्गर्ज्य गर्जनं विधाय जनतायाः लोकस्य हाहाकारकलकलं हा-हा-इत्यकारकं ध्वनिम् आकर्णयन् शृण्वन् घोरगदया प्रचण्डगदया मूर्तिं प्रतिमाम् अतुत्रुटत् भङ्क्तवान्। गदापातसमकालम् एव गदाप्रहारसमयम् एव अनेकार्बुदपद्ममुद्रामूल्यानि बहुसङ्ख्यमूल्यानि रत्नानि विविधमौक्तिकादीनि मूर्तिमध्यात् शिवलिङ्गस्य अभ्यन्तराद् उच्छलितानि उत्पतितानि, परितः समन्तात् अवाकीर्यन्त प्रकीर्णानि विस्तृतानि। स च महामदः दग्धमुखः महादुष्टः तानि विकीर्णितानि रत्नानि मौक्तिकानि मूर्तिखण्डानि शिवलिङ्गखण्डानि च क्रमेलकपृष्ठेषु उष्ट्रपृष्ठेषु आरोप्य संस्थाप्य सिन्धुनदम् एतन्नामिकां सरितम् उत्तीर्य उल्लङ्घ्य स्वकीयां स्वस्य विजयध्वजिनीं जयपताकिनीं गजिनीम् एतन्नामिकां राजधानीं शासनकेन्द्रं प्राविशत् गतवान्।

व्याख्यानम् -

महादेवविग्रहे गदाघाताद् अनन्तरमेव तत्रत्याः पूजका महामदं प्रार्थितवन्तः यत् - तेन महामदेन सर्वं स्वीकृतम्। आर्यसेनाः पराजिताः। अतः महत्सौभाग्यं तस्य। अतः महामदः तान् ताडयतु, मारयतु, विदारयतु, पर्वतादि-उच्चस्थानात् अधः निक्षिपयतु, परन्तु महादेवमूर्तिं नैव स्पृशतु इति। ते पूजकाः तस्मै सुवर्णकोटिद्वयमपि दातुम् इष्टवन्तः। परन्तु सः महामदः उक्तवान् - अहं मूर्तेः विक्रयणं न करिष्यामि, परन्तु तां नाशयिष्यामि इति। एवमुक्त्वा स जनानां क्रन्दनध्वनिम् अवज्ञाय भीषणगदया महादेवस्य मूर्तौ गदाघातं कृतवान्। गदया महामदः यदा महादेवमूर्तौ आघातम् अकरोत् तदा तत्तः बहुमूल्यानि रत्नानि समन्तात् विस्तृतानि। स पाप्मा तानि रत्नानि मदादेवस्य मूर्तिखण्डम् अपि उष्ट्रस्य पृष्ठे संस्थाप्य स्वस्य राजधानीं गजिनीं गतवान्।

व्याकरणविमर्शः

- आर्यसेनाः – आर्याणां सेनाः आर्यसेनाः इति षष्ठीतत्पुरुषः।
- सुवर्णकोटिद्वयम् - सुवर्णस्य कोटिद्वयं सुवर्णकोटिद्वयम् इति षष्ठीतत्पुरुषः।
- हाहाकारकलकलम् - हाहाकारं च कलकलं च हाहाकारकलकलम् इति द्वन्द्वसमासः।
- दग्धमुखः - दग्धं मुखं यस्य स दग्धमुखः इति बहुव्रीहिसमासः।

कोषः

- "शङ्खः स्यात्कम्बुरस्त्रियाम्" इत्यमरः।
- "विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्" इत्यमरः।
- "द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु" इत्यमरः।
- "ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः" इत्यमरः।
- "यशः कीर्तिः समज्ञा च" इत्यमरः।

पाठगतप्रश्नाः

१६. शिवमूर्तिस्पर्शनिषेधाय अनुरुद्धः महामदः किमुक्तवान्।

१७. मूर्तौ गदापातात्परं किमभवत्।

१८. दग्धमुखः इत्यत्र कः समासः।

११.७) साम्प्रतं मूलपाठमवच्छाम - २१

अथ कालक्रमेण सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे सशोकं सकष्टञ्च प्राणांस्त्यक्तवति महामदे, गोरदेशवासी कश्चित् शहाबुद्दीननामा प्रथमं गजिनीदेशमाक्रम्य, महामदकुलं धर्मराजलोकाध्वन्यध्वनीनं विधाय, सर्वाः प्रजाश्च पशुमारं मारयित्वा, तद्रुधिरार्द्रमृदा गोरदेशे बहून् गृहान् निर्माय चतुरङ्गिण्याऽनीकिन्या भारतवर्षं प्रविश्य, शीतलशोणितानप्यसयन् पञ्चाशदुत्तरद्वादशशतमितेऽब्दे (१२५०) दिल्लीमश्वयाम्बभूव।

अन्वयार्थः -

अथ गजिनीगमनात् परं कालक्रमेण समयचक्रेण सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे सशोकं शोकसहितं सकष्टं क्लेशसहितं च प्राणान् असून् त्यक्तवति परित्यक्तवति महामदे महामदनामके यवने, गोरदेशवासी गोरदेशवास्तव्यः कश्चित् कश्चन शहाबुद्दीननामा शहाबुद्दीनाभिधेयः प्रथमम् आदौ गजिनीदेशं गजिनीराजधानीम् आक्रम्य समाक्रम्य महामदकुलं महामूदवंशं धर्मराजलोकाध्वन्यध्वनीनं यमलोकमार्गपथिकं विधाय कृत्वा सर्वाः प्रजाः सर्वान् नागरिकान् च पशुमारं पशुवत्प्रहारेण मारयित्वा निहत्य तद्रुधिरार्द्रमृदा प्रजारक्तार्द्रभूम्या गोरदेशे गोरनामके देशे बहून् अनेकान् गृहान् गेहान् निर्माय विधाय

चतुरङ्गिण्या हस्त्यश्वरथपदातिकया अनीकिन्या सेनया भारतवर्षं भारताख्यदेशं प्रविश्य निविश्य शीतलशोणितान् अपि अनुष्णरक्तान् अपि असयन् असिना मारयन् पञ्चाशदुत्तरद्वादशतमितेऽब्दे (१२५०) इत्येतत्संख्यके संवत्सरे दिल्लीं दिल्लीनामिकां अश्वयाम्बभूव अधिकृतवान्।

व्याख्यानम् -

१०८७ -तमे वर्षे महामुदस्य मृत्यो परं गोरदेशवास्तव्यः शहाबुद्दीनाभिधेयः गजिनीराजधानीं गत्वा महामुदवंशीयान् हतवान्। ततः प्रजाजनान् पशुवत् प्रहृत्य अनेकसैन्यसहितः भारतवर्षं प्रविवेश। तत्र च अनुग्रस्वभावान् अपि असिना मारयन् १२५० इत्येतत्संख्यके संवत्सरे दिल्लीम् अधिकृतवान्।

व्याकरणविमर्शः

- शहाबुद्दीननामा – शहाबुद्दीनः नाम यस्य स शहाबुद्दीननामा इति बहुव्रीहिः।
- पशुमारम् - पशूपपदे मृधातोः "उपमाने कर्मणि च" इत्यनेन सूत्रेण णमुलि पशुमारम् इति रूपम्।
- तद्रुधिरार्द्रमृदा - तेषां रुधिराणि तद्रुधिराणि इति षष्ठीतत्पुरुषः। तैरार्द्रमिति तृतीयातत्पुरुषः। तादृशी मृद्, तया इति कर्मधारयः।
- शीतलशोणितान् - शीतलानि शोणितानि येषां ते शीतलशोणिताः, तान् इति बहुव्रीहिसमासः।
- अश्वयाम्बभूव – तेनातिक्रामतीत्यर्थे अश्वशब्दात् णिचि ततश्च लिटि भूधातोरनुप्रयोगे आमि प्रथमपुरुषैकवचने अश्वयाम्बभूव इति रूपम्।

कोषः

- "हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्" इत्यमरः।
- "अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि" इत्यमरः।
- "संवत्सरोऽब्दो हायनोऽस्त्री शरत्समाः" इत्यमरः।

पाठगतप्रश्नाः

१९. महामदः कस्मिन् वैक्रमाब्दे प्राणान् त्यक्तवान्।

२०. महामदमृत्योः परं कः गजनीम् आक्रान्तवान्।

२१. कदा च शहाबुद्दीनः दिल्लीश्वरः संवृत्तः।

२२. शीतलशोणितान् इत्यत्र कः समासः।

११.८) साम्प्रतं मूलपाठमवच्छाम - २३

ततो दिल्लीश्वरं पृथ्वीराजं कान्यकुब्जेश्वरं जयचन्द्रञ्च पारस्परिकविरोधज्वरग्रस्तं विस्मृतराजनीतिं भारतवर्षदुर्भाग्यायमाणमाकल-य्यानायासेनोभावपि विशस्य, वाराणसीपर्यन्तमखण्डमण्डलमकण्टकमकीटकिट्टं महारत्नमिव महाराज्यमङ्गीचकार। तेन

वाराणस्यामपि बहवोऽस्थिगिरयः प्रचिताः रिङ्गत्तरङ्गभङ्गा गङ्गाऽपि शोणितशोणा शोणीकृता, परस्सहस्राणि च देवमन्दिराणि भूमिसात्कृतानि। स एव प्राधान्येन यावनराज्याङ्कुरारोपकोऽभूत्। तस्यैव च कश्चित् क्रीतदासः कुतुबुद्दीननामा प्रथमभारतसम्राट् सञ्जातः

अन्वयार्थः -

ततः तस्मात्परं दिल्लीश्वरं दिल्लीप्रदेशाधिपं पृथ्वीराजम् एतन्नामकं चौहानवंशीयं राजानम्, कान्यकुब्जेश्वरं कान्यकुब्जदेशस्याधिपं जयचन्द्रम् एतन्नामकं पारस्परिकविरोधज्वरग्रस्तम् अन्योन्यविरोधज्वरकवलितं विस्मृतराजनीतिं क्षात्रकार्यानभिज्ञं भारवर्षदुर्भाग्यायमाणं भारतवर्षस्य दुर्दशां समागच्छन्तीम् आकलय्य ज्ञात्वा अनायासेन विना श्रमम् उभौ अपि द्वौ अपि पृथ्वीराजजयचन्द्रौ विशस्य विनाश्य वाराणसीपर्यन्तं काशीं यावत् अखण्डमण्डलं समस्तजनपदम् अकण्टकं विघ्नरहितम् अकीटकिट्टं कीटकिट्टशून्यं महारत्नम् इव महामणिम् इव महाराज्यं विस्तृतं साम्राज्यम् अङ्गीचकार स्वीकृतवान्। तेन आक्रमणकारिणा शहाबुद्दीनेन वाराणस्याम् अपि काशीनगर्याम् अपि बहवः अत्यधिकाः अस्थिगिरयः कीकसपर्वताः प्रचिता निर्मिताः। रिङ्गत्तरङ्गभङ्गा चञ्चलोर्मिबहुला गङ्गा अपि भागीरथी अपि शोणितशोणा रक्तरञ्जिता शोणीकृता शोणनदतां प्रापिता, परस्सहस्राणि च सहस्राद् अप्यधिकानि च देवमन्दिराणि देवतायतनानि भूमिसात्कृतानि खण्डितानि। स एव शहाबुद्दीन एव प्राधान्येन प्रमुखतया भारते एतन्नामके भारतवर्षे यवनराज्याङ्कुरारोपकः यवनशासनस्य बीजारोपकारी अभूत् बभूव। तस्य एव शहाबुद्दीनस्य एव कश्चिद् एकः क्रीतदासः अनुचरः कुतुबुद्दीननामा कुतुबुद्दीनाभिधेयः प्रथमभारतसम्राट् भारतवर्षस्य आदिमः अधिपतिः सञ्जातः अभवत्।

व्याख्यानम् -

शत्रवो हि छिद्रमास्थाय प्रविशन्ति। एवमेव पृथ्वीराज-जयचन्द्रयोः भेदच्छिद्रम् अवलम्ब्य शहाबुद्दीनेन यवनभूपेन भारतमाक्रान्तम्। तेन हि सर्वान् भारतीयान् पराजित्य स्वराज्यं निष्कण्टकं कृतम्। शहाबुद्दीनेन काशीनगर्याम् अपि अत्यधिकाः अस्थिगिरयः निर्मिताः। तरङ्गबहुला भागीरथी अपि रक्तरञ्जिता शोणनदतां प्रापिता। सहस्राद् अप्यधिकानि देवतायतनानि विखण्डितानि। शहाबुद्दीन एव प्राधान्येन प्रमुखतया भारतवर्षे यवनशासनस्य अङ्कुरारोपकारी अभूत्। शहाबुद्दीनस्य एव कुतुबुद्दीननामकः अनुचरः भारतवर्षस्य आदिमः अधिपः अभवत्।

व्याकरणविमर्शः

- विस्मृतराजनीतिम् - विस्मृता राजनीतिः येन स विस्मृतराजनीतिः, तमिति बहुव्रीहिसमासः।
- विशस्य - विपूर्वात् शसेः क्त्वोल्र्यपि विशस्य इति रूपम्।
- रिङ्गत्तरङ्गभङ्गा - तरङ्गाणां भङ्गाः तरङ्गभङ्गा इति षष्ठीतत्पुरुषः। रिङ्गन्तः तरङ्गभङ्गा यस्याः सा रिङ्गत्तरङ्गभङ्गा इति बहुव्रीहिः।

कोषः

- "किट्टं मलेऽस्त्रियाम्" इत्यमरः।

- "कीकसं कुल्यमस्थि च" इत्यमरः।
- "भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिः" इत्यमरः।

पाठगतप्रश्नाः

२३. यावनकाले दिल्लीश्वरः कः।

२४. यावनकाले कान्यकुब्जेश्वरः कः।

२५. शहाबुद्दीनेन गङ्गा कीदृशी विहिता।

२६. यवनशासनस्य भारते अङ्कुरारोपकः कः।

२७. को भारतस्य प्रथमः यवनसम्राट्।

२८. रिङ्गत्तरङ्गभङ्गा इत्यत्र कः समासः।

११.९) साम्प्रतं मूलपाठमवच्छाम - २४

तमारभ्याद्यावधि राक्षसा एव राज्यमकार्षुः। दानवा एव च दीनानदीदलन्। अभूत् केवलम् अकबरशाह-नामा यद्यपि गूढशत्रुर्भारतवर्षस्य तथापि शान्तिप्रियो विद्वत्प्रियश्च। अस्यैव प्रपौत्रो मूर्तिमदिव कलियुगम्, गृहीतविग्रह इव चाधर्मः, आलमगीरोपाधिधारी अवरङ्गजीवः सम्प्रति दिलीवल्लभतां कलङ्कयति। अस्यैव पताका केकयेषु, मत्स्येषु, मगधेषु, अङ्गेषु बङ्गेषु कलिङ्गेषु च दोधूयन्ते, केवलं दक्षिणदेशेऽधुनाऽप्यस्य परिपूर्णो नाधिकारः संवृत्तः।

अन्वयार्थः -

तं कुतुबुद्दीननामकम् आरभ्य अद्यावधि साम्प्रतं पर्यन्तं राक्षसा एव धर्मविरोधिनः यवना एव राज्यं शासनम् अकार्षुः कृतवन्तः। दानवाः धर्मविरोधिनः एव च दीनान् दुःखग्रस्तान् अदीदलन् नाशितवन्तः। केवलम् एकाकी अकबरशाह-नामा एतन्नामको नृपः यद्यपि भारतवर्षस्य भारतदेशस्य गूढशत्रुः प्रच्छन्नशत्रुः तथापि शान्तिप्रियः शमरतः विद्वत्प्रियः पण्डितप्रियः च अभूत् आसीत्। अस्य एव अकबरशाहनामकस्य एव प्रपौत्रः तनयात्मजः मूर्तिमद् इव सविग्रह इव कलियुगं कलिकालः, गृहीतविग्रहः धृतवपुष्कः अधर्मः इव पापः इव, आलमगीरोपाधिधारी आलमगीर इत्युपनाम्ना प्रसिद्धः अवरङ्गजीवः अवरङ्गजीवाभिधेयः सम्प्रति इदानीं दिलीवल्लभतां दिल्लीश्वरतां कलङ्कयति दूषयति। अस्य एव अवरेङ्गजीवस्य एव पताका ध्वजः केकयेषु पञ्जाबदेशे, मत्स्येषु मत्स्यदेशे, मगधेषु मगधदेशे, अङ्गेषु अङ्गदेशे बङ्गेषु बङ्गदेशेषु कलिङ्गेषु कलिङ्गदेशे च दोधूयन्ते पौनःपुण्येन समुच्छ्रियन्ते, केवलं दक्षिणदेशे दक्षिणप्रदेशे अधुना इदानीम् अस्य म्लेच्छनृपस्य अबरङ्गजीबस्य परिपूर्णः समग्ररूपेण अधिकारः प्रशासनाधिकारः न संवृत्तः न सम्पन्नः।

व्याख्यानम् -

कुतुबुद्दीनाद् आरभ्य यवनराज्यम् तदानीमपि इति ज्ञापितवान् ब्रह्मचारिगुरुः। दुष्टेषु यवनशासकेषु एकः अकबरशाहनामको नृपः शान्तिप्रय आसीत्। तस्य प्रपौत्रः अत्यन्ततया दुष्टः राज्यशासनं तदा कुर्वन् आसीत्।तस्य ध्वज एव केकेय-मत्स्य-मगध-अङ्ग-बङ्ग-कलिङ्गदेशेषु उत्तोलित आसीत्। केवलं दक्षिणप्रदेशे अबरङ्गजीबस्य परिपूर्णः अधिकारः नासीत्।

व्याकरणविमर्शः

- गूढशत्रुः - गूढश्चासौ शत्रुश्च गुढशत्रुः इति कर्मधारयः।
- विद्वत्प्रियः - विद्वांसः प्रिया यस्य स विद्वत्प्रियः इति बहुव्रीहिः।
- गृहीतविग्रहः - गृहीतो विग्रहो येन स गृहीतविग्रहः इति बहुव्रीहिः।
- अदीदलन् - दल विदारणे इति धातोः लुङि झिप्रत्यये अदीदलन् इति रूपम्।
- दोधूयन्ते - धूञ् कम्पने इति धातोः यङि प्रथमपुरुषबहुवचने दोधूयन्ते इति रूपम्।।

कोषः

- "असुरा दैत्यदैतेयदनुजेन्द्रारिपर्वताः" इत्यमरः।

पाठगतप्रश्नाः

२९. यवननृपेषु को विद्वत्प्रियः।

३०. कः दिल्लीवल्लभतां कलङ्कयति।

३१. कुत्र कुत्र अवरङ्गजीवस्य पताका आसीत्।

११.१०) साम्प्रतं मूलपाठमवच्छाम - २६

दक्षिणदेशो हि पर्वतबहुलोऽस्ति अरण्यानीसङ्कुलश्चास्तीति चिरोद्योगेनापि नायमशकन्महाराष्ट्रकेसरिणो हस्तयितुम्। साम्प्रतमस्यैवाऽऽत्मीयो दक्षिणदेशशासकत्वेन 'शास्तिखान'-नामा प्रेष्यत इति श्रूयते। महाराष्ट्रदेशरत्नम्, यवन-शोणित-पिपासाऽऽकुलकृपाणः, वीरता-सीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान-दोर्दण्डः, मुकुटमणिर्महाराष्ट्राणां, भूषणं भटानां, निधिर्नीतीनाम् कुलभवनं कौशलानां पारावारः परमोत्साहानां कश्चन प्रातःस्मरणीयः स्वधर्माऽऽग्रहग्रहग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन्पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति। विजयपुराधीश्वरेण साम्प्रतमस्य प्रवृद्धवैरम्। 'कार्यं वा साधयेयं देहं वा पातयेयम्' इत्यस्य सारगर्भा महती प्रतिज्ञा। सतीनां, सतां त्रैवर्णिकस्य, आर्यकुलस्य, धर्मस्य भारतवर्षस्य च आशा-सन्तान-वितानस्यायमेवऽऽश्रयः। इयमेव

वर्तमाना दशा भारतवर्षस्य। किमधिकम् विनिवेदयामो योगबलावगतसकलगोप्यतमवृत्तान्तेषु योगिराजेषु इति कथयित्वा विरराम।

अन्वयार्थः -

दक्षिणदेशो भारतस्य दक्षिणप्रदेशो हि निश्चयेन पर्वतबहुलः गिरिप्रचुरः अस्ति अरण्यानीसङ्कुलः महारण्यव्याप्तः च पुनः अस्ति वर्तते इति अनेन कारणेन चिरोद्योगेन बहुधा प्रयासेन अपि अयम् अबरङ्गजीवः न नहि अशकत् समर्थः अभवत् महाराष्ट्रकेसरिणः महाराष्ट्रसिंहान् हस्तयितुं वशीकर्तुम्। साम्प्रतम् इदानीम् अस्य एव अबरङ्गजीवस्य आत्मीयः प्रियः दक्षिणदेशशासकत्वेन 'शास्तिखान'-नामा प्रेष्यत सम्प्रेष्यते इति श्रूयते इति आकर्ण्यते। महाराष्ट्रदेशरत्नं महाराष्ट्रादेशस्य चूडामणिः, यवन-शोणित-पिपासाऽऽकुलकृपाणः म्लेच्छरक्तपानेच्छाकुलखड्गकः, वीरता-सीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान-दोर्दण्डः शूरताङ्गनाकेशवेशरम्यघननागकेशरचर्चनदेदीप्यमानभुजखण्डः, महाराष्ट्राणां महाराष्ट्रदेशवास्तव्यानां जनानां शेखररत्नसदृशः, भटानां शूराणां भूषणम् अलङ्कारः, नीतीनां राजनयानां निधिः कोषः, कौशलानां दक्षतानां कुलभवनम्, पारावारः समुद्रः परमोत्साहानाम् उत्कृष्टोत्साहानाम्, कश्चन प्रातःस्मरणीयः अत्यन्तं माननीयः स्वधर्माग्रहग्रहग्रहिलः सनातनधर्मस्य दृढतया परिपालकः, शिव इव शङ्कर इव धृतावतारः स्वीकृतावतारः, शिववीरः तन्नामकः अस्मिन् नेदीयसि एव अस्मिन् सन्निकर्षे एव सिंहदुर्गे सिंहगढनामके दुर्गे ससेनः सेनासहितः निवसति। विजयपुराधीश्वरेण विजयपुरशासकेन साम्प्रतम् इदानीम् अस्य शिववीरस्य प्रवृद्धं समुपबृंहितं वैरं शत्रुत्वम्। 'कार्यं स्वतन्त्रताप्राप्तिरूपं कर्म वा साधयेयं सिद्धं विधास्यामः, देहं कायं वा पातयेयम् पातयिष्यामः' इति अस्य शिववीरस्य सारगर्भा सारसमन्विता महती प्रतिज्ञा भीषणः सङ्कल्पः। सतीनां कुलव्रतानाम्, सतां सज्जनानाम्, त्रैवर्णिकस्य ब्राह्मणक्षत्रियवैश्यात्मकस्य, आर्यकुलस्य आर्यसमाजस्य, धर्मस्य सनातनहिन्दुधर्मस्य भारतवर्षस्य भारतप्रदेशस्य च आशा-सन्तान-वितानस्य आशापरम्पराविस्तरणस्य अयं शिववीरः आश्रयः आधारः। इयम् एव एषा एव भारतवर्षस्य भारतदेशस्य वर्तमाना दशा इदानीन्तनदशा। किमधिकं कियद्बहुलं विनिवेदयामः सूचयामः योगिराजेषु योगिवरेषु योगबलावगतसकलगोप्यतमवृत्तान्तेषु ध्यानबलावगताखिलरहस्यमयवृत्तेषु इति एवं प्रकारेण कथयित्वा उक्त्वा विरराम विरतवान्।

व्याख्यानम् -

दक्षिणदेशो गिरिप्रचुरः महारण्यव्याप्तः चासीत् अत एव अबरङ्गजीवः तस्याधिकारे असमर्थः। तत्र अबरङ्गजीवस्य प्रियः दक्षिणदेशशासकत्वेन 'शास्तिखान'-नामा आसीत्। तत्र महाराष्ट्रदेशरत्नभूतः म्लेच्छरक्तपानेच्छासम्पन्नः, महाराष्ट्रदेशवास्तव्यानां शेखररत्नभूतः, भटानाम् अलङ्कारः, राजनयानां निधिः इत्येवम्भूतः प्रातःस्मरणीयः सनातनधर्मस्य दृढतया परिपालकः शिव इव शिववीरः आसीत्। स सिंहदुर्गे निवसन्नासीत्। तेन विजयपुराधीशस्य शत्रुत्वं वर्धितम्। 'कार्यं वा साधयेयं देहं वा पातयेयम्' इति शिववीरस्य सारगर्भः भीषणः सङ्कल्पः। स एव आर्याणाम् आश्रयः। एवं प्रकारेण योगिराजं कथयित्वा ब्रह्मचारिगुरुः विरतवान्।

व्याकरणविमर्शः

- पर्वतबहुलः - पर्वतैर्बहुलः पर्वतबहुलः इति तृतीयातत्पुरुषः।
- अरण्यानीसङ्कुलः - महद् अरण्यम् अरण्यानीति इन्द्रवरुणेति सूत्रेण आनुकि ङीपि अरण्यानीशब्दः। अरण्यान्या सङ्कुलः अरण्यानीसङ्कुलः इति तृतीयातत्पुरुषह।
- महाराष्ट्रदेशरत्नम्- महाराष्ट्रदेशस्य रत्नम् इति कर्मधारयसमासः।
- यवनशोणितपिपासाकुलकृपाणः - यवनानां शोणितं यवनशोणितम् इति षष्ठीतत्पुरुषः। तस्य पिपासा इति षष्ठीतत्पुरुषः। तया आकुलः इति तृतीयातत्पुरुषः। तादृक् कृपाणो यस्य स इति बहुव्रीहिः।

पाठगतप्रश्नाः

३२. दक्षिणदेशः कीदृश आसीत्।

३३. दक्षिणदेशशासकत्वेन यवनराजेन को नियुक्तः।

३४. शिववीरः मुकुटमणिः कस्य आसीत्।

३५. शिववीरः कुत्र निवसति स्म।

३६. शिववीरः कीदृशः।

पाठसारः

योगिराजो भारतवर्षस्य इदानीन्तनस्थितिं ज्ञातुं ब्रह्मचारिगुरुं पृष्टवान्। तदा ब्रह्मचारिगुरोः अवस्था अत्र वर्णिता। स हि भारतवर्षस्य यवनकृतायाः अवस्थाया वर्णनावसरे अत्यन्तं दुःखमनुभूतवान्।

ब्रह्मचारिगुरुः अत्र सनातनधर्मावलम्बिनाम् आर्याणां विषये खेदं प्रस्तुतवान्। स कथितवान यद् वज्रनिर्मिता हि तस्य रसना। अन्यथा तु भारतीयेषु दुष्टानां यवनानाम् अत्याचारस्य वर्णनेन सा भिन्ना भवेत्। एवमेव आर्याणां हृदयमपि वज्रसारम्। अतः एव यवनानाम् अत्याचारं स्मृत्वा अपि तद् अनेकप्रकारेण न भिन्नम्। न हि तद् हृदयम् अग्निना दग्धम्। एवमेव आश्रमवासिनः ते निन्द्याः, यतो हि अस्मिन् यवनात्याचारसमये अपि ते आर्यवंशीयाः वयम् इति साभिमानं जीवनधारणं, श्वासधारणं सञ्चरणं च कुर्वन्ति।

ततः मुनिः स ब्रह्मचारिगुरुं प्रति उक्तवान् वस्तुतो हि कालगतिः अननुमेया। सम्प्रति तु कालवशादेव तत्सर्वं प्रनष्टम्। तटप्रपात इव कालकृतिर्भवति भङ्गुरा। अत एव कालवशेन एव भवति सनातनधर्मस्य पीडनम् इति विविच्य धैर्यधारणं कर्तव्यम्

अत्र महामदस्य भारताक्रमणं सोमनाथमन्दिरस्य लुण्ठनं च वर्णितम्। यदा धैर्यं प्रसन्नता प्रतापः तेजः, विक्रमः धर्मः इत्यादिगुणानाम् आश्रयः विक्रमादित्यः स्वर्गलोकं गतवान् तदा कश्चित् गजिनीनामकस्य स्थानस्य राजा महामदः सैन्यानि स्वीकृत्य भारतवर्षम् आगतवान्। स द्वादशवारं भारतर्षं प्रति आक्रान्तवान्। तदा एकवारं स गुर्जरप्रदेशस्य विख्यातस्य सोमनाथमन्दिरस्य लुण्ठनं कृतवान्। स गदया महादेवमूर्तिं नाशितवान्।

महादेवविग्रहे गदाघाताद् अनन्तरमेव तत्रत्याः पूजका महामदं प्रार्थितवन्तः यत् यथा महादेवमूर्तिः भग्ना न भवेत्। महामदः तथा वार्तां नैव श्रुतवान्। गदया स यदा महादेवमूर्तौ आघातम् अकरोत् तदा तत्तः बहुमूल्यानि रत्नानि समन्तात् विस्तृतानि। स पाप्मा तानि रत्नानि मदादेवस्य मूर्तिखण्डम् अपि उष्ट्रस्य पृष्ठे संस्थाप्य स्वस्य राजधानीं गजिनीं गतवान्।

१०८७ -तमे वर्षे महामुदस्य मृत्यो परं गोरदेशवास्तव्यः शहाबुद्दीनाभिधेयः गजिनीराजधानीं गत्वा महामुदवंशीयान् हतवान्। ततः प्रजाजनान् पशुवत् प्रहृत्य अनेकसैन्यसहितः भारतवर्षं प्रविवेश। तत्र च अनुग्रस्वभावान् अपि असिना मारयन् १२५० इत्येतत्संख्यके संवत्सरे दिल्लीम् अधिकृतवान्। स शहाबुद्दीन एव प्राधान्येन प्रमुखतया भारतवर्षे यवनशासनस्य अङ्कुरारोपकारी अभूत्। शहाबुद्दीनस्य एव कुतुबुद्दीननामकः अनुचरः भारतवर्षस्य आदिमः अधिपः अभवत्।

कुतुबुद्दीनाद् आरभ्य यवनराज्यं प्रवृत्तम्। दुष्टेषु यवनशासकेषु एकः अकबरशाहनामको नृपः शान्तिप्रिय आसीत्। तस्य प्रपौत्रः अत्यन्ततया दुष्टः राज्यशासनं तदा कुर्वन् आसीत्। तस्य ध्वज एव केकेय-मत्स्य-मगध-अङ्ग-बङ्ग-कलिङ्गदेशेषु उत्तोलित आसीत्। केवलं दक्षिणप्रदेशे अबरङ्गजीबस्य परिपूर्णः अधिकारः नासीत्।

दक्षिणदेशो गिरिप्रचुरः महारण्यव्याप्तः चासीत् अत एव अबरङ्गजीवः तस्याधिकारे असमर्थः। तत्र अबरङ्गजीवस्य प्रियः दक्षिणदेशशासकत्वेन 'शास्तिखान'-नामा आसीत्। तत्र महाराष्ट्रदेशरत्नभूतः म्लेच्छरक्तपानेच्छासम्पन्नः, महाराष्ट्रदेशवास्तव्यानां शेखररत्नभूतः, भटानाम् अलङ्कारः, राजनयानां निधिः इत्येवम्भूतः प्रातःस्मरणीयः सनातनधर्मस्य दृढतया परिपालकः शिव इव शिववीरः आसीत्। स सिंहदुर्गे निवसन्नासीत्। तेन विजयपुराधीशस्य शत्रुत्वं वर्धितम्। 'कार्यं वा साधयेयं देहं वा पातयेयम्' इति शिववीरस्य सारगर्भः भीषणः सङ्कल्पः। स एव आर्याणाम् आश्रयः। एवं प्रकारेण योगिराजं कथयित्वा ब्रह्मचारिगुरुः विरतवान् इति पाठसारः।

पाठान्तप्रश्नाः

१. सोमनाथमन्दिरलुण्ठनवृत्तान्तं वर्णयत।

२. महामदस्य भारताक्रमणं वर्णयत।

३. दक्षिणदेशं वर्णयत।

४. अथ "वीर, गृहीतमखिलं वित्तम्, पराजिता आर्यसेनाः, बन्दीकृता वयम्, सञ्चितममलं यशः,

इतोऽपि न शाम्यति ते क्रोधश्चेदस्मान् ताडय, मारय, छिन्धि, भिन्धि, पातय, किन्तु त्यजेमाम् अकिञ्चित्करीं जडां महादेवप्रतिमाम्। यद्येवं न स्वीकरोषि तद् गृहाणास्मत्तोऽन्यदपि सुवर्णकोटिद्वयम्, त्रायस्व, मैनां भगवन्मूर्तिं स्प्राक्षीः" - इति साम्रेडं कथयत्सु रुदत्सु पतत्सु विलुण्ठत्सु प्रणमत्सु च पूजकवर्गेषु - "नाहं मूर्तिं विक्रीणामि, किन्तु भिनद्मि" इति सञ्जर्ज्य जनताया हाहाकारकलकलमाकर्णयन् घोरगदया मूर्तिमतुत्रुटत्। गदापातसमकालमेव चानेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि परितोऽवाकीर्यन्त। स च दग्धमुखः तानि रत्नानि मूर्तिखण्डानि च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत्। - इति व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

१. आर्याणां दम्भोलिघटिता रसना।

२. आर्याणां वज्रसारमयं हृदयम्।

३. दम्भोलिना घटिता दम्भोलिघटिता इति तृतीयातत्पुरुषः।

४. सकलानर्थमयः, सकलवञ्चनामयः, सकलपापमयः सकलोपद्रवमयश्च यवनदुराचारवृत्तान्तः।

५. विलक्षणो भगवान् सकल-कला-कलाप-कलनः सकलकालनः करालः कालः।

६. सिंह-व्याघ्र-भल्लूक-गण्डक-फेरु-शश-सहस्रव्याप्तानि अरण्यानि जनपदीकरोति कालः।

७. मन्दिर-प्रासाद-हर्म्य-शृङ्गाटक-चत्वरोद्यानतडागगोष्ठमयानि नगराणि च काननीकरोति।

८. विक्रमादित्यः धैर्येण प्रसादेन प्रतापेन तेजसा वीर्येण विक्रमेण शान्त्या श्रिया सौख्येन धर्मेण विद्यया च सह परलोकं गतः।

९. गजिनीनामकं स्थानं गजिनीस्थानमिति शाकपार्थिवादिवत्समासः। तत्र निवासी इति सप्तमीतत्पुरुषः।

१०. राज्ञां परस्परवैरं यदा प्रवृद्धं तदा गजिनीस्थाननिवासी महामदः भारतवर्षम् आक्रान्तवान्।

११. भारतवर्षाक्रमणात्परं महामदः भारतीयान् मारयित्वा मन्दिराणि प्रतिमाः च नाशयित्वा, बहून् जनान् स्वस्य दासरूपेण अङ्गीकृत्य बहूनि रत्नानि च बलात् स्वीकृत्य गजिनीस्थानं प्रति अगच्छत्।

१२. महामदः द्वादशवारं भारतस्य विलुण्ठनं कृतवान्।

१३. महामदः गुर्जरदेशचूडायितं सोमतीर्थं धूलीचकार।

१४. महामदः सोमनाथमन्दिरस्य द्विशतसुवर्णपरिमितां घण्टां स्वीकृतवान्।

१५. गुर्जरदेशस्य चूडायितं गूर्जरदेशचूडायितम् इति षष्ठीतत्पुरुषः।

१६. शिवमूर्तिस्पर्शनिषेधाय अनुरुद्धः महामदः "नाहं मूर्तिं विक्रीणामि, किन्तु भिनद्मि" इति उक्तवान्।

१७. मूर्तौ गदापातात्परमेव अनेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्याद् उच्छलितानि परितः अवकीर्णानि।

१८. दग्धं मुखं यस्य स दग्धमुखः इति बहुव्रीहिसमासः।

१९. महामदः सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे प्राणान् त्यक्तवान्।

२०. महामदमृत्योः परं गोरदेशनिवासी शहाबुद्दीनः गजनीम् आक्रान्तवान्।

२१. पञ्चाशदुत्तरद्वादशतमितेऽब्दे (१२५०) शहाबुद्दीनः दिल्लीश्वरः संवृत्तः।

२२. शीतलानि शोणितानि येषां ते शीतलशोणिताः, तान् इति बहुव्रीहिसमासः।

२३. यावनकाले दिल्लीश्वरः पृथ्वीराजः।

२४. यावनकाले कान्यकुब्जेश्वरः जयचन्द्रः।

२५. शहाबुद्दीनेन गङ्गा शोणितशोणा विहिता।

२६. यवनशासनस्य भारते अङ्कुरारोपकः शहाबुद्दीनः।

२७. कुतुबुद्दीनः भारतस्य प्रथमः यवनसम्राट्।

२८. रिङ्गत्तरङ्गभङ्गा - तरङ्गाणां भङ्गाः तरङ्गभङ्गा इति षष्ठीतत्पुरुषः। रिङ्गन्तः तरङ्गभङ्गा यस्याः सा रिङ्गत्तरङ्गभङ्गा इति बहुव्रीहिः।

२९. अकबरशाह-नामा गूढशत्रुर्भारतवर्षस्य तथापि शान्तिप्रियो विद्वत्प्रियश्च।

३०. अकवरशाह-नामकस्य प्रपौत्रो मूर्तिमदिव कलियुगम्, गृहीतविग्रह इव चाधर्मः, आलमगीरोपाधिधारी अवरङ्गजीवः सम्प्रति दिलीवल्लभतां कलङ्कयति।

३१. अवरङ्गजीवस्य पताका केकयेषु, मत्स्येषु, मगधेषु, अङ्गेषु बङ्गेषु कलिङ्गेषु च आसीत्।

३२. दक्षिणदेशः पर्वतबहुलः अरण्यानीसङ्कुलश्चासीत्।

३३. दक्षिणदेशशासकत्वेन यवनराजेन शास्तिखान-नामको नियुक्तः।

३४. शिववीरः महाराष्ट्राणां मुकुटमणिरासीत्।

३५. शिववीरः सिंहदुर्गे ससेनो निवसति स्म।

३६. शिववीरः सतीनां सतां त्रैवर्णिकस्य आर्यकुलस्य, धर्मस्य भारतवर्षस्य च आशा-सन्तान-वितानस्य आश्रयः।

॥इति एकादशः पाठः॥